**PG – 551**

# I Semester M.T.A. (Integrated Course) Degree Examination, December 2009/January 2010
## Tourism Administration
## SANSKRIT LANGUAGE
## Paper – 1.2 : Sanskrit Kavya Guccha

Time : 3 Hours Max. Marks : 80

*Instructions : 1) Answer in Sanskrit/Kannada/ English.*
*2) Questions I, VII and VIII should be answered in Sanskrit only.*

I. समीचीनं उत्तरं चिनुत । **(1×10=10)**

1) हर्षचरित कर्ता ________ ।
(बाण:, भोज:, कालिदास:, भास:)

2) दुर्वासस्य विस्वरं श्रुत्वा देवी सरस्वती ________ ।
(दूषिता, जहास, कुपिता, जग्राह)

3) सरस्वती मन्दाकिनीमनुसरन्ती ________ लोकमवततार ।
(ब्रह्म, राक्षस, मनुष्य, देव)

4) सरस्वती शोणस्य ________ तीरे समवातरत् ।
(पश्चिमे, उत्तरे, पूर्वस्मिन्, दक्षिणे)

5) अश्ववृन्दस्य मध्ये ________ वर्षदेशीयं युवानमद्राक्षीत् ।
(सप्तदश, अष्टादश, शोडश:, पञ्चदश)

6) अशोकवनिकाया मारुति: ________ वृक्षं अरुरोह ।
(कदली, शिंशुपा, चूत:, चम्पका)

7) ________ द्विरसजननी आसीत् ।
(सिंहिका, जानकी, सुरसा, अनला)

8) मनसस्तु परा बुद्धि: बुद्धे: ________ परो मत: ।
(आप:, तेजस् , आकाश:, आत्मा)

P.T.O.

9) पूर्वकृतं _______________ कर्तारमनुगच्छति ।
(कर्म, पापं, पुण्य, सन्तोष:)

10) _______________ युक्तस्य सत: शरीरं न विशीर्यते ।
(सत्वेन, धैर्येण, प्रज्ञया, अधैर्येण)

II. एकस्य उत्तरं संस्कृत भाषायां/कन्नडभाषायां वा आङ्ग्ल भाषायां लिखत । **(1×10=10)**
ಬೇಕಾದ ಒಂದನ್ನು ಸಂಸ್ಕೃತದಲ್ಲಿ/ ಕನ್ನಡದಲ್ಲಿ/ ಆಂಗ್ಲಭಾಷೆಯಲ್ಲಿ ಉತ್ತರಿಸಿರಿ.
Answer **any one** either in **Sanskrit/Kannada** or **English**.

1) समुद्रोल्लङ्घनं कुर्वता हनुमता यात्राप्रत्यूहानि कथं निवारितानि विस्तरयत ।
ಹನುಮಂತನು ಸಮುದ್ರ ಉಲ್ಲಂಘನೆ ಮಾಡುವಾಗ ಎದುರಿಸಿದ ವಿಘ್ನಗಳನ್ನು ಹೇಗೆ ನಿವಾರಿಸಿದನು. ವಿವರಿಸಿರಿ.
Describe how Hanuman removed all the hurdles on his sojourn to Lanka.

2) भोजराजस्य देश, काल, कृति: अधिकृत्य प्रबन्धं लिखत ।
ಭೋಜರಾಜನ ದೇಶ, ಕಾಲ ಮತ್ತು ಕೃತಿಗಳನ್ನು ಕುರಿತು ಪ್ರಬಂಧವನ್ನು ಬರೆಯಿರಿ.
Write an essay on the place, date and works of Bhojaraj.

III. द्वयो: अनुवादं कृत्वा भावार्थं लिखत । **(5×2=10)**
ಎರಡನ್ನು ಅನುವಾದಿಸಿ ಭಾವಾರ್ಥವನ್ನು ವಿವರಿಸಿರಿ.
Translate and explain **any two** of the following stanzas.

1) कल्याणि त्वद्वियोगेन तीव्रवेगेन ताम्यत: ।
राघवेन्द्रस्य दूतं ममन्यथा मास्म मान्यथा: ।।

2) त्वत्पित्राहं परित्रात: पूर्वं पर्वतभेदिन: ।
तस्मान्नास्मि विपक्षोऽद्य सपक्ष इति मां भज ।।

3) न हिंसयति यो जन्तून् मनोवाक्कायहेतुभि: ।
जीवितार्थापनयनै: प्राणिभिर्न स हिंस्यंते ।।

4) यथा धेनुसहस्त्रेषु वत्सो विन्दति मातरम् ।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ।।

5) सुखस्यानन्तरं दु:ख दु:खस्यान्तरं सुखम् ।
सुखदु:खे मनुष्याणां चक्रवत् परिवर्तत: ।।

IV. **एकस्य** गद्यभागस्य अनुवादं कुरुत । **(10×1=10)**

ಒಂದರ ಗದ್ಯಭಾಗದ ಅನುವಾದವನ್ನು ಮಾಡಿರಿ.

Translate **any one** passage.

1) अत्रान्तरे सरस्वत्यवतरणवार्तामिव कथयितुं मध्यमं लोकमवततारांशुमली । क्रमेण स्पष्टे प्रदोषसमये सावित्री शून्यहृदयामिव किमपि ध्यायन्तीं सास्त्रां सरस्वतीमवादीत्, 'सखि, जानास्येव यादृश्यो विसंस्थुला गुणवत्यपि जने दुर्जनवन्निर्दाक्षिण्या: क्षणभङ्गिन्यो दुरतिक्रमणीय न रमणीय दैवास्य वामा वृत्तय: । अनन्यशरणा प्रतिपद्यस्व स्वश्रेयसे स्वचरणरज: पवित्रितत्रि शासुरं सुधासूतिकलिका कल्पितकर्णावतंसं देवदेवं त्रिभुवनगुरुं त्र्यम्बकम् ।

2) एवं चिन्तयता हनूमता कथमपि नीते निशीथसमये दशकण्ठस्तु निद्राशेषेण स्मरशरप्रहारेण च कलषीकृताक्ष: जानकीदर्शनेच्छया मुकुटरत्नप्रभया च तिरस्कृत नक्षत्रमालश्शनैश्शनैरविशदशोकवनिकाम् ।

एतद्दर्शनेन वेपमानतनुलता मैथिली कापुरुषविय वचनपारंपर्येण विदीर्यमाणहृदया हृदयदयिताशय प्रत्ययादमुमे तृणमन्तरत: कृत्वा स्थिता प्रत्यभाषत । अयि सकलसमाचार प्रतिष्ठानिष्ठ: परमेष्ठी ननु कुलगुरुर्भवत: परकललत्ररतिरपत्रपां जनयति हि गोत्रजानम् ।

V. **त्रयाणां** सन्दर्भं सूचयत । (किमपि पठ्यभागं अविहाय) **(4×3=12)**

**ಮೂರರ** ವಾಕ್ಯಗಳ ಸಂದರ್ಭವನ್ನು ವಿವರಿಸಿರಿ. (ಯಾವ ಪಠ್ಯವನ್ನು ಬಿಡದಂತೆ)

Explain with reference to context **any three** (Without omitting any text)

1) मर्षय भववन्, अभूमिरेषा शापस्य ।

2) अल्पीयस्यैव कालेन स ते शापशोकविरतिं वितरिष्यति ।

3) सप्राण एव वसतीति विचित्रमेतत् ।

4) मारूते प्रेरितोऽस्मि अद्य सौम्य विश्रम्य गम्यताम् ।

5) सम्प्रज्वलति सा भूय: समिभ्दिरिव पावक: ।

6) सूक्ष्मधर्मार्थनियतं सतां चरितमुत्तमम् ।

VI. **द्वयो:** लघुटिप्पणीं लिखत । **(4×2=8)**

ಎರಡನ್ನು ಕುರಿತು ಟಿಪ್ಪಣಿಯನ್ನು ಬರೆಯಿರಿ.

Write short notes on **any two.**

1) बाणकवि:        2) लङ्काधिपति:

3) महाभारतम्        4) भोजदेव:

VII. अ) एतान् शब्दान् उपयुज्य संस्कृतभाषायां वाक्यानि रचयत । (1×5=5)

1) यथा–तथा
2) त्वा
3) गमिष्यामि
4) नम:
5) अपि

आ) वाक्यदोषान् परिहरत । (1×5=5)

1) नगरस्य बहि: उपवनं विद्यते ।
2) भवान् कुत्र गच्छसि ?
3) विष्णुं नम: ।
4) अलं साहसात् ।
5) पुत्रस्य सह पिता गच्छति ।

VIII. परिच्छेदं पठित्वा प्रश्नानामुत्तराणि **संस्कृत** भाषायां लिखत । (2×5=10)

ಪಂಚ್ಛೇದವನ್ನು ಓದಿ ಪ್ರಶ್ನೆಗಳಿಗೆ ಸಂಸ್ಕೃತದಲ್ಲಿ ಉತ್ತರಿಸಿ.

Read the passage and answer the question in **Sanskrit**.

कदाचित् कृष्ण: गोपालै: रामेण च सार्धं क्रिडितुं गत: । तत्र स: एकान्ते स्थित्वा मृदं भक्षितवान् । गोपाला: बलरामश्च धावित्वा यशोदायै अकथयन् । यशोदा कृष्णं करेण गृहीत्वा अवदत् – ''भो कृष्णं मृदं मा भक्षयेति बहुवारमुक्तोऽसि । नेदानीमपि विरमसि । एते बालका भणन्ति, तथा तव भ्राता रामोपि कथयति । गच्छेदानीम् इत: परमपि भक्षयसि चेत् ताडयामि त्वा निर्दयम्''–इति । कृष्णाोऽ वदत्– ''अम्ब, नाहं मृत्तिकामभक्षयम् ।सर्वे बालका मिथ्या वदन्ति । अग्रजोऽपि मिथ्यावादी । लोकेऽ हमेक एव सत्यवादी । मम वचने विश्वासो नास्ति चेत् पश्य त्वमेव । मुखं व्याददामि''–इति । नर्हि दर्शयाननमिति माता अवदत् । यशोदा तदास्ये चतुर्दश भुवनानि आत्मानं य दृष्ट्वा विस्मिता अभवत् ।

1) कृष्ण: केन सार्धं क्रीडितुं गत: ?
2) कृष्ण: किं भक्षितवान् ?
3) यशोदा कृष्णं करेण गृहित्व किं अवदत् ?
4) लोके क: सत्यवादी ?
5) यशोदा कृष्णस्यानने किं अपश्यत् ?

---

KLE SOCIETY CENTRE